Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ८५६ - घ

Title राक्षसकाव्यम् सटीकम्

Author रविदेवः

Extent ५ Age १८६४

Subject काव्यम् सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७५६-घ

राक्षसकाव्यम् सटीकम्

नं० ७५९-घ

पत्राणि ५

५ पत्राणि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

राक्षसकाव्यम् प. ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥ॐ नमो गणेशाय ॥ पंक्तिपक्षहरं वंदे पंक्तिस्यंदनसंभवं॥ पंक्तिदिग्यशसं वंदे पंक्तिदिग्विजयप्रदं॥१॥ कोपि स्त्रियासार्द्धं विपिनं उपेत्य
स्त्रियमाह॥ कश्चिन्ना पुरुषः वहुवनं वनं विचरन् वहुतरं वनं जलं यन्त्रतत। जीवनं भुवनं वनमित्यमरः गहनं काननं वनमित्यमरः। भ्रम
न् इमां गां वाणीं दिग्दृष्टि दीधिति स्वर्ग वा गिंद्र पाणि वारिषु भूमी पशौ गोशब्दो विद्वद्भिर्दशसु स्मृत इति॥ वनितां स्त्रियं वभाषे उ [illegible] वाचेत
१ न्वयः। किंविशिष्टः। वयःस्थः वयसि स्थितः। यौवनस्थ इत्यर्थः। किंविशिष्टां वश्यां पुनः वनात्मवदनां वनं पयः तदात्मको देहो यस्य स चंद्र
स्तेन तुल्यं वदनमाननं यस्याः सा तां वनार्द्रां जलसिक्तामित्यमरः। किं कृत्वा खे आकाशे नभोंतरिक्षं गगनमनंतं सुरवर्त्म खमित्यमरः।
तर्वैर्य्यरिप्रदं मेघं उदीक्ष्य दृष्ट्वा। तरवो वृक्षास्तेषामरिरग्निस्तद् रिर्जलं तत्प्रददातीति तर्वैर्य्यरिप्रदो मेघस्तं समुत्थितं समुत्पन्नं वीक्ष्य पु
नः किंविशिष्टः मदनकलः मदकलः सुंदर इत्यर्थः। कीदृशीं वा तां सकलां समग्रां। स्त्री विशेषे एकला मिहिविभा वादिमिवर्त्तमानामित्यर्थः॥१॥

॥श्रीगणेशायनमः॥ कश्चिद्वनं वहुवनं विचरन् वयस्थो वश्यां वनात्मवदनां वनितां वनार्द्रां। तर्वैर्यरिप्रद मुदीक्ष्य समु
त्थितं खे तां गामिमां मदकलः सकलां वभाषे"१"पश्यांऽजदृग्गिरितटेषु कुमात्मसाक्षान् भूदेवराजरिपुशत्रुस
मावधूतान्'। वैश्वानरारिजरिपुघ्नशरामि धूतैर्दृक्छ्रोत्रशत्रुभिरुपासितपुष्पशोभान्"२"

हे अब्जदृक् कमलनयने। गिरितटेषु पर्वतभूमिषु कुमात्मसा [illegible] क्षान् कदंवान् कुमाता कदंवा तत्समानाऽक्षा क्षायेषां ते ता
न् इति पश्यावलोकयेत्यर्थः। किंविशिष्टान् भूदेवानिति। भूदेवाः व्राह्मणास्तेषां राजा सोमस्तद्रिपुर्मेघस्तस्य शत्रुर्वायुस्ते
न समावधूतान् कंपितानित्यर्थः। वैश्वानरोऽग्निस्तस्यरिपुर्जलं तत्रजातो मत्स्यस्तद्रिपुः कैवर्त्तः तस्य घातकः कामस्तस्य
शरैर्वाणैरभिधूतास्ते दृक्छ्रोत्रशत्रुभिर्मयूरैरुपासितपुष्पशोभान् सेवितपुष्पशोभानित्यर्थः॥ मयूरास्तु दृष्टीनां क
र्णीनां अर्थाद्विरहिणां वैरिणो भवंत्येवेति दृक्छ्रोत्रशत्रुभिरित्युक्तम् २ ॥ श्रीरस्तु गुरुगणेशभगवतीप्रसादात्॥ २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

परेपेति । अमरान् गोपायतीति अमरगुप् । अहिं हतवान् अहिघ्नः इन्द्रः । अम्भोभिः प्रसन्नाभिर् अद्रिसारसदृशीभिः पर्वतानां सारा निर्झराः तत्तुल्याभिर् अद्भिर् जलैः धरणीम् आप्लावयति व्याप्तां करोतीत्यर्थः । अरदः पयोदः सिताभिर् बलाकाभिः आकाशगाभिर् सितः कुशलः शबलश्छिन्नः प्रबुद्धैर् बीजैः प्रविकसितैः कुमुदसितैः वनमिवैव विभाति शोभते । एतत्सर्वं परेपेत्यर्थः । अवदातः सितो गौरो बलक्षो धवलोऽर्जुनः इत्यमरः । कुम्भेनीलासितश्यामकालश्यामलमेचकाः इति वा । ३ । गोष्ठमिति । गवि तिष्ठतीति गोष्ठं घृतं पानीयं त्रिष्वसुखं घृतामृते इत्यमरः ॥ सुकृतं वहतीति सुकृतवाहास्ताभिर् अम्भोभिर् गोभिर् रश्मिभिर् बहुधा हिमघ्नो रविः यद् बहुधा समुद्धरति समाकर्षति । गोषु रश्मिषु भवं गव्यं तद् अवरगतं सत् तदाकाशगतं तत्र शिखिजालसंस्थं सत् । शिखी अग्निस्तज्जो धूमः स आत्मा यस्य सः मेघः तत्र सम्प्रकृति तिष्ठतीति शिखिजा

परेपो द्रिसारसदृशीभिर् अम्भोभिर् अद्रिराप्लावयत्यमरगुब् धरणीम् अहिघ्नः । अरदः सिताभिर् असितः शबलैः खगाभिर् बीजैः सितैर् इव विभाति वनं प्रबुद्धैः ॥ ३ ॥ गोष्ठं घृतं सुकृतवद्भिर् अम्भोभिर् अग्र्यं गोभिः समुद्धरति यद् बहुधा हिमघ्नः । तद् अवमं वरगतं शिखिजातसंस्थं विस्पंदमानम् अभिवर्द्धयतीह गोजान् ॥ ४ ॥ अम्बुजलाशनिभदृग् घनजालवक्त्रा वार्चिस्वरेभनिभगा गजदोः समोरुः । सीरिध्वजप्रसवतुल्यविपाण्डुदृशी सौत्रासंगता प्रमुदिता प्रसमीक्ष्य वादे ॥ ५ ॥

सीरविस्यासोध्वजायस्यतुलोदृशोय

सीरी बलभद्रः तस्य ध्वजा तालस्तस्माज्जातः फलः तद्वत् तत्तुल्यो कुचौ यस्याः सा = २

तमसंस्थं तत् घृतं विस्पंदमानं प्रस्रवमानम् इह भूतले गोजान् तृणादीन् अभिवर्द्धयतीति परेपेति संबंधः । शिखावानाशुशुक्षणिः इत्यमरः ४ अम्बुजलाशेति । असौ नायिका वादे मेघं प्रसमीक्ष्य दृष्ट्वा त्रासंगता भयं प्राप्ता अथ च पुरुषेण हासंगता सती प्रमुदिता नंदितेति परेण सह अन्वयः कथंभूता अम्बुरोहत इत्यम्बुजं कमलं जलाशो मत्स्यस्ताभ्यां निभे तुल्ये दृशौ यस्याः सा अम्बुजलाशनिभदृक् । अथवा अम्बुजोत्पलाशनिभदृक् इति पाठः । अम्बुजं कमलं तस्य पलाशः पत्रं तद्वत् दृष्टी यस्याः सेति अयं मुख्यः पाठः । अन्यः गौणः ॥ घनाज्जातमुदकं घनजं तद् आत्मा चंद्रस्तद्वत् वक्त्रं यस्याः सा घनजात्मवक्त्रा वारि चरंतीति गच्छंतीति अदंति वार्चाः मयूरास्तेषाम् इव स्वरो यस्याः (सा वार्चिस्वरा । इभेन निभं गमनं यस्याः सा इभनिभगामनीत्यर्थः । गजस्य करिणो दोर्हस्तस्तद्वत् समम् ऊरू यस्याः सा गजदोः समोरुः करिभोरुरित्यर्थः ॥ ५ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सूर्यभ्रुनेति। उभ्रावरः वृषभः ईत्ततोभ्याहितं ईत्तलाहितं कज्जलं तस्योच्चयः सम्हहस्त तुल्यरूपं यस्यासौ तं मेघं गर्ज्जंतं प्रतिनानदीति अ
तिशयेन नादं करोतीति पश्यति संबंधः कीदृशः सूर्यस्याशावो रश्मयस्तन्नाम विद्यते यासां ताः सूर्याभ्र नामनो गावः तासां पतिः सूर्यभ्रुना
२ मतिवा पाठः। तस्मिन् पक्षे हे सूर्येन वोढे उन्नता उन्नमीकृता येन सः प्रगामी अधोगच्छति यतः वाचो नाम विद्यते यासां ताभिर्गोभिः परिवृतः
कीदृशीभिर्विषनामदाभिः क्षीरदाभिरित्यर्थः। विषं क्षीरं च पानीयं इत्यभिधानात् प्रमुदितः प्रहृष्टः सन्नित्यर्थः। ६ । एनमिति। हेवनरु

2

सूर्यभ्रुनामपतिं रुन्नतद्रकं प्रगामी वाग्नामभिः परिवृतो विषनामदाभिः। उस्रांवरः प्रमुदितः प्रतिनानदीति गर्ज्जति मी
त्तलाहितो च्चयतुल्यरूपं ॥ ६ ॥ एनं पयोदपुतिं रुन्नामितः पयोदं सरव्यं महीतलगतः प्रतिगर्ज्जतीव। भित्वा वनिं वनक
हाद्रिशिरो रुहाभ्यां संप्रस्थितोऽमृतधारैरभिविच्यमानः ॥ ७ ॥

हाद्रि हे कमललोचने एनं पश्येत्यन्वयः। महीतलगतः भूयिष्ठः पयोदपति वृषभस्थं पयोदं मेघं प्रतिगर्ज्जतीवस्वस्मादुच्चा ॥
स्थितत्वात्सहनादितिभावः। उन्नतमिति। उन्नतं सत् किं कृत्वा शिरोरुहाभ्यां शृंगाभ्यां मवनिं भूमिं भित्वा विदार्य पुनः किं
विशिष्टः संप्रतिस्थितः पुनः किं विशिष्टः अमृतधारैः मेघैरभिषिच्यमानः सिच्यमानः ॥ ७ ॥ २

तोतोजेति। हे पयोजदलदृक्कमलदललोचने विषधराः मेघाः तीव्रं सोढमशक्यं विषनीरं परिनिर्वयंति प्रक्षिपंतीत्यन्वयः
।कथंभूताः शुचिमासो आषाढज्येष्ठयोः अथवस्या आकाशमागता इत्यर्थः। स्वस्यावितिपाठे सुगमः पुनः कीदृशाः नभस्यन
भसोः मासोः भाद्रश्रावणयोरितिसंपदोरितिसंपाद्विशिष्टाः पुनः किंविशिष्टाः मेघाः तोतोजस्तुवर्णविशिष्टितिजरक्तं भूधरधातुको
गेरकादयस्तत्तुल्यंरूपं येषां ते तोतोजावद्भि। तजभूधरधातुरूपाः पीतारक्तस्वेतस्या[illegible]मरूपाइत्यर्थः। परपेतिसंबंधः। ८॥

तोतोजवित्त तजभूधरधातुरूपाः स्वस्याः पयोजदलदृक्शुचिशुक्रमासोः। मासोर्नभस्यनभसोरितिसंपदस्ते
तीव्रं विषं विषधराः परिनिर्वयंति" ८ "स्वयोनिभस्य ध्वजसंभवानां श्रुत्वा निनादं गिरिगह्वरस्यः। तमोरि
विंबप्रतिविंबधारी रौतीति कांते पवनाशनाशः। "९"॥

स्वयोनिभस्येति हि कांते पवनाशनानभक्षातीति पवनाशनाशो मयूरः रौति नदतीति पदयोरन्वयः। किंकृत्वा तमोरिविं
बस्तस्यरूपे विंबप्रतिविंबधरतीति तमोरिविंबप्रतिविंबधारी। यथा जयेषयत्। प्रतिविंब तस्य चंद्रस्य रूपं तथा तस्यापीत्युक्तं।
पुनः कीदृशः गिरिगह्वरस्यः गुहास्थः सन् इति किं कृत्वा स्वयोनिः स्वोत्पत्तिकारणकाष्ठादिकं तदेव भस्मं यस्य सअ(
ग्निस्तस्य ध्वजो धूमस्तस्य तत्संभवास्तदुत्पन्नाः स्वयो। निभस्याध्वजसंभवाः एषां तेषां निनादं श्रुत्वा। मर्दलध्व
जशंकया नानदीति भावः जिह्मगः पवनाशन इत्यमरः॥९॥ ॥ ॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गोष्ठश्चेति। गवि भूमौ तिष्ठतीति गोष्ठं कुंकुमवद्वपुर्यस्य स कुंकुमवपुः स प्रयो अम्बाम्बमेधा यः अद्रयः पर्वताः दैत्याः अ
सुराः भुजगोत्तमाः सर्पास्तेषां शत्रुरिंद्रस्तं गोपायतीति रक्षतीति स प्राऽद्रिदैत्यभुजगोत्तमशत्रुगोपः इंद्रगोपः असौ प्रतिराजते
२ शोभते उर्वीधरा भं नभ्रधरसदृशं। अचिराद्भुतं इदानीमेवोत्थितमध्वरं जलधरं खे आकाशे दृष्ट्वा अहिहा मयूराः प्रमुदि
३ तोऽस्तीति शेषः। हिमहनं सूर्यं आह्वयते हिमहाह्वयानश्चेति शेषः एतदपीति संबंधः॥ १०॥ कुम्भेति। असौ कुम्भांबुदः

गोष्ठश्च कुंकुमवपुः प्रतिराजतेऽसौ सप्रयद्रिदैत्यभुजगोत्तमशत्रुगोपः। उर्वीधराभमचिरोद्भुतमध्वरं खे दृष्ट्वा
हि हा प्रमुदिता हिमहाह्वयानः॥ १०॥ कुम्भांबुदः क्षरति तोयमसावजस्रमन्या विमौ रणग ताविवचेभराजौ
। अन्ये त्वमी द्विरदवृंदनिभाः क्षरंतः प्रच्छादयंत्यमरसिद्धविमानमार्गम्॥ ११॥ ॥

श्यामो मेघः अजस्रबहुलं तोयं क्षरति वर्षति अन्या विमौ मेघौ रणगतौ संग्रामप्राप्तौ इभराजा विश्व विभातः। अ
न्ये तु अमी मेघाः अमराश्च सिद्धाश्च तेषां विमानमार्गमाकाशं क्षरंतः जलवर्षी कुर्वंतः संतः प्रच्छादयंति आच्छादयं २
तीत्यर्थः। कीदृशाः द्विरदवृंदनिभा गजसमूहसदृशा इत्यर्थः॥ ११॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वार्द्ध इति। वारि ददातीति वार्द्धः खेगछंतीति खगाः क्षितिधरेष्वागमनं तेन प्रकाशाः। यद्वा क्षितिधरेभ्यः आगमनं क्रमणं ते
न प्रकाशाः प्रकाशीभूताः तेमीरथचक्रधाराः भोहस्ती रासभोगर्दभः तुरंगमोऽश्वास्तेषां तुल्यो घोषो येषां ते एतत्समानध्वनय
इत्यर्थः। वात्यीरिता वातप्रक्षिप्ताः खमाकाशमवतत्य व्याप्य पयउदकं त्सरंतो वर्षंतो वार्भिर्जलैः क्षितिं पृथिवीं घृतधरामे
धाः प्रतिवर्त्तीति परिनिवृत्तिं नियंतीत्यर्थः। क्रियायामेकवचनं वेदाः प्रश्नअर्जुनं दृसं ।१२। एषइति। भुजंगमारिः म
यूरः अंघ्रिपाः हृक्षास्तान् अश्नातीति तद्विपुर्जलं तद्दंतीति अंघ्रिपाशनरिपुघ्नआदित्यस्तस्य सुतः कर्णस्तस्यारिरर्जुनस्तमा
नीकायस्यसः अर्जुनवृक्षसमारूढ्यतिष्ठतीति। हे सुगात्रिकमनीयदेहे कलेघोडशवार्षिकीयस्य स्वनैः प्रमुदितस्य प्रक

परिनिवृत्तिं नियं
तीत्यर्थः =२

वार्द्धाः खगाः क्षितिधरागमनप्रकाशा नेमीभरासभतुरंगमतुल्यघोषाः। वात्यीरिताः खमवतत्य वनं क्षरंतो वा
र्भिः क्षितिं घृतधराः प्रतिनिवर्त्ततीति ॥१२॥ एषांघ्रिपाशनरिपुघ्नसुतारिसाह्ममारुह्य तिष्ठति सुगात्रि भुजंगमारिः।
यस्य स्वनैः प्रमुदितस्य मया घवाले तालध्वजावरजसूनुशराः पतंति ॥१३॥ उष्माविशंस्थलगतोऽत्ति तथैव की
टो वार्जे द्विजो हरिदृगेषदशार्द्धगूढः। वाताशनः खशयनं स्मरति स्थलस्य चक्रु

ष्टस्य मम अघाहनि तालध्वजो बलस्तस्यावरजोऽनुजः कृष्णस्तस्य सूनुः कामस्तस्य शरा बाणाः पतंति व्यथयंतीत्यर्थः।
१३। उष्माविशमिति। स्थलगतः कीटः कृमिर्यथा उष्माविशं गोमयमत्ति खादति। तथैव हरिदृक्वानरनयनः द्विजः
कश्यपः वार्भ्यंडिजत्पन्नं से वालादिकमत्ति। कीदृशः द्विजः दशार्द्धगूढः पंचभिर्गुप्तः इत्यर्थः। सुरशत्रुनामा चक्षुःश्रवाः स्थ
लभक्ष्यः स्मरति स्वशायनं च स्मरति। कथंभूतः वातमेवाश्नातीति वाताशनः। कस्मात् वनभयाज्जलात्रासादित्यर्थः। पक्षो
विद्यतेऽस्येति पक्षी अश्वमेधतुरगप्रतिमो पक्षिषु तुल्यास्ते एवाष्ठवर्णाः। पीताद्यवर्णा वानुरूपवर्ण इति पाठे सुमंवनं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वारं मेघं द्विति एवार्थेस्तमाहूयते आकारयतीव तथैव विषराशिमग्नः अगाधजलमग्नो मे को पि शालूरो प्लवति भ्रमरामं संतं श
४ ब्दं करोति कीदृशो मेकः खशयैः विलशयनैः ।२५। नाविष्करावनमिति। मधुकलः मदोन्मत्तः नाउकणः कुमात्वसाहं कद
वमुपेत्याणं स्वाक्रीडते। किंविशिष्टो ना। अंगनया समेतः सस्त्रीकः कथंभूतं वनं विष्करालंपक्षिणं वनं सम्महो यत्र ततर्। ना
गौ को वाजि विकर विष्किर पत्रिदः इत्यमरः। तु पुनः अन्योन्यं नारामयास्वभार्ययासह तयोः जद्रवीवनमेवाधिष्ठायं पयः पति
५ राम्यिस्तस्मा ज्जातं चंद्रं दृलीते अभिकां स्वातियद्वा पयः पतिजं अरंभुनक्ति कथंभूतं गोजं मलिवराभं मलिपुउत्कृष्टः इंद्रनी
लस्तद्राभमित्यर्थः ।२६। स्तुतमिति। असो नरः स्तुतवस्त्रं विभर्ति। महत् बृहत् पुनः कीदृशं त्तत जवर्णमिभं त्ततजं रक्तं

रवंतिति१द्वि· पत्स्यं स्वमे घतुरगपतिमो ऽब्दवर्तो वारं मेवं द्विति समाहूयते हे हिधः। मेकस्तथैव खशयैः समवेघपालिः राव
वारद्वि करोत्यपि ति भ्रमं विषराशिमग्नः "२५" नाविष्करं वनमुपेत्य कुमात्वसाहमाक्रीडते मधुकरोंगनया समेतः। अ
न्यस्त्वयं मलिधराभमुपेत्य गोजं नारामयासह पयः पतिजं दृलीते "२६" स्तुतं महत् त्ततजवर्णनिभं नरो सौ
विभर्त्यम्बूनि च भिनत्ति सरोरुहालिं। तज्जेन चापि रजसा वनितां वयस्यामभ्युद्गरत्यवकिरत्यभिषिच्यमानः "२७"

तस्य वर्ण आरक्तता तन्निभं आरक्तमित्यर्थः। एतद्विशेषणद्वयेन स्त्रिया एव वस्त्रं दधत्यपि प्रायः च पुनः अम्बूनि सरोरुहालिक
मला नि भिनत्ति समुच्चितो ति तज्जेन कमलोद्भवेन रजसा परागेन वयस्यः तरुणां वनितां। ए स्त्रियं अभ्युद्गरति मंडयति ४
अर्थात् वनितां या अभिषिच्यमानः स्वयमपि वनितां स्त्रियं अवकिरति सिंचतीत्यर्थः। स्तुतो वा सस्ति सार्थ्यो इति कोषः।
एतेन जलक्रीडा वर्णिता: स्ववस्त्रं तां परिधापयतत् वस्त्रं स्वयं परिधारयतीति भावः ।।२७।। ।। ।। ।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पंक इति। अद एतत् इभवृंदं हस्तिसमूहं पंके कर्दमे निमग्नं सत् तिमित्रयवृंदमिव पयोदवृंदमिवाभाति शोभते तद्यथा तिमयो
मत्स्यास्तेषां त्रयो धाम गृहमिति यावत्। खात् किं जलं ददातीति मित्रयदा मेघा इति कथंभूतं सवारि सदजलसहितं। अ
त एव गर्जितं शब्दायमानमित्यर्थः। समदनः। कामाविष्टः सुपत्नीमयूरः प्रतिरोरवीति शब्दं करोति। कथंभूतः सुपत्नीवा
५ यत्ता चंद्रस्तस्य नायचंद्रकांते न शिताग्निका चित्रा तनुर्यस्यासौ मयूरस्य पक्षे हरिनीलरत्नखचितवर्णचंद्रतुल्यं चंद्रकांते
न विचित्रतनुरित्यर्थः। पुनः किं विशिष्टः योषिद्वतं योषिन्मयूर तद्वत् इति पश्यति संबंधः। १८ ॥ विस्फोटितेति। अतो

पंके निमग्नमिभवृंदं दर्मदः सवारि गर्जति मित्रयद्वृंदमिवावभाति। वार्यामनायशितचित्रतनुः सुपत्नीयो
षिद्वतः समदनः प्रतिरोरवीति ॥ १८ ॥ विस्फोटितांबररवेण रिरंसुरेष संत्रासितो हरिरनो कुहनिष्कुटर
स्थः संलीयते तडितमप्यभिवीक्ष्य विग्नः खात्तं महत्तरमसौ समनुप्रविष्टः ॥ १९ ॥ एतावदुत्तमवचः सुम
नाः स उक्त्वा रंत्वा दिनं सह तया प्रियया यदीनः। युक्तं चतुर्भिरनुडुद्भिरदीनवाग्भिरारुह्य यानमथ संप्रययौ
स्वगेहं ॥ २० ॥ इति राक्षसकाव्यं समाप्तम् ॥ ॥ ॥ ॥ ॥ ॥

कुहनिष्कुटस्थः। शालकोटस्थः रिरंसुः रंतुकामः विस्फोटितांऽबररवेण विस्फोटितः प्रकटीकृतः अंबररवः शब्दस्तेन
त्रासितः संलीयते पुनरस्ते तडितमपि विद्युतमपि अभिवीक्ष्य दृष्ट्वा विग्नः भयं तं संत्रासितः सन् खात् बिलात् महत्तरं
खं बिलं समनुप्रविष्टः। एतदपि पश्यति संबंधः एवं सर्वेषु श्लोकेषु ज्ञेयं। १९। एतावदिति। सुमनाः सुष्ठु मनो यस्या
सौ एतावत् सुमनः हर्षीकृतमुत्तमवचः उत्कृष्टं वचनमुक्त्वा तया प्रियया स्त्रिया सह दिनं रंत्वा क्रीडित्वा यानं समारुह्य स्वगेहे
स्वगेहे स्वगृहं प्रययौ इत्यन्वयः कथंभूतं यानं चतुर्भिरनुडुद्भिः वृषभयुक्तं। किं विशिष्टैरनुडुद्भिरदीनवाग्भिः अदीनं वहंतस्तैः
न वाहस्तैः सुखवाहकैः इत्यर्थः २० इति राक्षसकाव्यं संपूर्णं ॥ सं १८६४ श्रा॰ शु॰ षष्ठ्यां रवौ लिखितं सभाचंद्रमौ २१ ५

[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative